CAREERINDIA

# RR + PR

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S** **ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ**

**Code No. : 16-S** **Subject : First Language — SANSKRIT**

**प्रथम भाषा — संस्कृतम्**

**( ಹಳೆ ಪಠ್ಯಕ್ರಮ / Old Syllabus )**

**(ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ + ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Regular Repeater + Private Repeater)**

***ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

i) ಇದು ಪ್ರಶ್ನೆ–ಸಹಿತ–ಉತ್ತರಪುಸ್ತಕವಾಗಿದೆ.

ii) ಪ್ರತಿ ಪ್ರಶ್ನೆಗೂ ಉತ್ತರ ಬರೆಯಲು ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿಯೇ ಸ್ಥಳಾವಕಾಶ ಮಾಡಿಕೊಡಲಾಗಿದೆ. ಉತ್ತರಗಳನ್ನು ನಿರ್ದಿಷ್ಟಪಡಿಸಿದ ಜಾಗದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು.

iii) ಈ ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯು 'ಹೊಂದಿಸಿ ಬರೆಯಿರಿ' ಪ್ರಶ್ನೆಯನ್ನೊಳಗೊಂಡಂತೆ ಒಟ್ಟು 63 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿರುತ್ತವೆ.

iv) ವಿದ್ಯಾರ್ಥಿಗಳು ಸೀಸದ ಕಡ್ಡಿ (ಪೆನ್ಸಿಲ್) ಯಿಂದ ಉತ್ತರಗಳನ್ನು ಬರೆಯಬಾರದು. ಪೆನ್ಸಿಲ್‌ನಿಂದ ಉತ್ತರ ಬರೆದಲ್ಲಿ ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದಿಲ್ಲ.

v) ಬಹು–ಆಯ್ಕೆ, ಖಾಲಿ ಸ್ಥಳಗಳನ್ನು ಭರ್ತಿ ಮಾಡುವುದು, ಹೊಂದಿಸಿ ಬರೆಯುವ ಪ್ರಶ್ನೆಗಳ ವಿಷಯದಲ್ಲಿ ಕೆರೆದು ಅಳಿಸುವುದು / ತಿದ್ದಿ ಬರೆಯುವುದು / ಗುರುತಿಸುವುದು ಮಾಡಿದಲ್ಲಿ ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಅನರ್ಹವಾಗುತ್ತದೆ.

vi) ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯನ್ನು ಓದಲು 15 ನಿಮಿಷಗಳ ಹೆಚ್ಚಿನ ಕಾಲಾವಕಾಶ ನೀಡಲಾಗಿದೆ.

vii) ನಿಮ್ಮ ಪ್ರಶ್ನೋತ್ತರ ಕಿರುಪುಸ್ತಕದ ಬಲಭಾಗದಲ್ಲಿರುವ ಗೆರೆಯ ಪಕ್ಕದ ಖಾಲಿ ಜಾಗದಲ್ಲಿ ಯಾವುದೇ ರೀತಿಯ ಬರಹಗಳನ್ನು ಬರೆಯಬಾರದು.

www.careerindia.com

CAREERINDIA



***परीक्षार्थिनां सामान्याः सूचना :***

i) इदं प्रश्नयुक्तम् उत्तरपुस्तकम् अस्ति ।

ii) अस्मिन् प्रश्नयुक्ते उत्तरपुस्तके 'संयोज्य लिखत' प्रश्नसहितम् आहत्य त्रिषष्ठिः ( 63 ) प्रश्नाः सन्ति ।

iii) प्रत्येकं प्रश्नस्य उत्तरं लेखितुं प्रश्नयुक्ते उत्तरपुस्तिके एव पर्याप्तः स्थलावकाशः प्रकल्पितः । निर्दिष्टस्थानेषु एव उत्तराणि लेखनीयानि ।

iv) परोक्षार्थिनः उत्तराणि अङ्कनी (पेन्सिल्) द्वारा न लिखेयुः । पेन्सिल् द्वारा लिखितानि उत्तराणि मौल्यमापनार्थं न परिगण्यन्ते ।

v) समुचितोत्तरचयनप्रश्नाः, रिक्तस्थानं पूरयत, संयोज्य लिखत एतेषां प्रश्नानाम् उत्तराणि सम्मार्ज्य लिख्यन्ते चेत् मौल्यमापनार्थं न परिगण्यन्ते ।

vi) परीक्षार्थिभ्यः प्रश्नानां पठनार्थम् अर्थग्रहणार्थं च पञ्चदश निमेषाः अधिकाः प्रदत्ताः ।

vii) दक्षिण पार्श्वे आरक्षित स्थाने किमपि न लेखनीयम् ।

www.careerindia.com

CAREERINDIA



I. निम्नलिखितेषु प्रश्नषु अपूर्णविवरणेषु वा प्रत्येकाय चत्वारः विकल्पाः प्रदत्ताः तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । उपयुक्तं विकल्पं चित्वा प्रश्नस्य समक्षे निर्दिष्टस्थान अक्षरसहितं अस्योत्तरं पूरयतु । 15 × 1 = 15

1. 'रत्नहरिणम्' नाटकस्य रचयिता एषः भवति –
   (A) भासः (B) एच्० वि० नागराज्
   (C) बाणभट्टः (D) व्यासः ।

2. 'अस्माकम्' अत्र एषा विभक्तिः अस्ति –
   (A) प्रथमा (B) सप्तमी
   (C) षष्ठी (D) तृतीया ।

3. अत्र विजातीयं पदम इदं भवति –
   (A) विंशतितमः (B) त्रयः
   (C) षष्ठः (D) दशमः ।

4. 'कुरुकुलप्रदीपः' एषः भवति –
   (A) घटोत्कचः (B) चन्द्रापीडः
   (C) कर्णः (D) अभिमन्युः ।

5. 'गच्छन्' अस्य स्त्रीलिङ्गरूपम् इदं भवति –
   (A) गच्छन्ती (B) गच्छता
   (C) गच्छति (D) गच्छा ।

6. आदिकविः एषः भवति –
   (A) बाणभट्टः (B) कालिदासः
   (C) वाल्मीकिः (D) भोजराजः ।

7. स्वाधीनः अस्य विरुद्धार्थकं पदम् इदं भवति –
   (A) पराधीनः (B) दीनः
   (C) प्राधीनः (D) आदीनः ।

8. विलासवत्याः दुःखस्य कारणम् इदं भवति –
   (A) दुर्बलता (B) अनपत्यता
   (C) दरिद्रता (D) कान्तिहीनता ।

9. एतेन तुल्यं धनं नास्ति –
   (A) दानेन (B) शीलेन
   (C) सत्येन (D) सन्तोषेण ।



www.careerindia.com

CAREERINDIA



10. 'कालः' समानार्थकं पदम् इदं भवति –

(A) समयः (B) दिवा

(C) रात्रिः (D) रविः ।

11. अत्र समूहेतरपदम् इदं भवति –

(A) गत्वा (B) कृत्वा

(C) ज्ञात्वा (D) आगत्य ।

12. हर्तुम् – तुमुन प्रत्ययः :: हतवान् –

अत्र चतुर्थं पदम् इदं भवति –

(A) क्त्वा प्रत्ययः (B) क्तवतु प्रत्ययः

(C) शतृ प्रत्ययः (D) क्त प्रत्ययः ।

13. वराहमिहिरस्य पिता एषः भवति –

(A) आदित्यदासः (B) रामदासः

(C) कालिदासः (D) भीमदासः ।

14. क्रियापदस्य मूलरूपम् इदं भवति –

(A) धातुः (B) नामपदम्

(C) अव्ययम् (D) तिङन्तम् ।

15. विद्यायाः महत्वभूतं अङ्गम् इदं भवति –

(A) कृष्णफलकम् (B) सुधाखण्डः

(C) ग्रन्थालयः (D) क्रीडाङ्गणम् ।

II. रिक्तस्थानानि पूरयत – 5 × 1 = 5

16. उपनिषदः वेदानां .............................. भागः ।

17. इन्द्रियाणि .............................. आहुः ।

18. पादं .............................. वज्रभिन्नम् ।

19. चञ्चलात्मकं .............................. भवति ।

20. व्याधिः .............................. निवर्तते ।



www.careerindia.com

CAREERINDIA



III. 21. संयोज्य लिखत — 5 × 1 = 5

| अ | | आ | |
|---|---|---|---|
| i) | सूर्योदयवर्णनम् | a) | मन्त्री |
| ii) | पितामहस्य वचनात् दूतः | b) | वेदव्यासः |
| iii) | नाकस्पर्धिनी | c) | घटोत्कचः |
| iv) | कर्दमः | d) | मधुराविजयम् |
| v) | सुमन्त्रः | e) | दरिद्रः |
| | | f) | भारतभूमिः |
| | | g) | अर्णवः |

IV. एकवाक्येन उत्तरं लिखत — 10 × 1 = 10

22. नीतिमार्गं के न परिलङ्घयन्ति ?
23. विद्या किं किं जनयति ?
24. योगी राज्ञे किं किं दत्तवान् ?
25. अरुक् कः भवति ?
26. भारते प्राचीनतमं साहित्यं किम् ?
27. चम्पूकाव्यं कयोः सम्मिश्रणं भवति ?
28. मानससरसः काः नद्यः प्रवहन्ति ?
29. के निष्करुणाः इति हरिणः वदति ?
30. मरीचिः कस्य मानसपुत्रः आसीत् ?
31. बिलासवत्याः ताम्बूलकरङ्कवाहिनी का ?

V. लघूत्तराणि संस्कृतभाषया लिखत — 5 × 2 = 10

32. विक्रमः योगीश्वर किमवदत् ?
33. मानससरसः उद्भवविषये पुराणकथा का ?
34. कं लोकः अनुप्रसीदति ?
35. तक्रसेवनस्य वैशिष्ट्यं किम् ?
36. धृतराष्ट्रः घटोत्कचं कथं समाधत्ते ।

**अथवा**

कुबेरः किमर्थं सुवर्णवृष्टि कृतवान् ?

VI. निर्देशानुसारम् उत्तरं लिखत — 8 × 2 = 16

37. सन्धिं विभज्य सन्धिनाम लिखत — 2 × 1 = 2

i) यस्तु

ii) एकत्रापि ।



www.careerindia.com

CAREERINDIA



38. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – 2 × 1 = 2

i) त्वया पाठः पठनीयः ।

ii) राधा देवं वन्दमाना गायति ।

39. विग्रहवाक्यं विलिख्य समासनाम लिखत – 2 × 1 = 2

i) वृकोदरः

ii) वरतन्तुशिष्यः ।

40. वाक्यदोषं परिहरत – 2 × 1 = 2

i) देवालयस्य बहिः वृक्षः अस्ति ।

ii) रामं नमः ।

41. लकार-पुरुष-वचनानि लिखत – 2 × 1 = 2

i) भविष्यति ।

ii) प्राकटयत् ।

42. तद्धितान्तपदं वियुज्य प्रत्ययस्य नाम लिखत – 2 × 1 = 2

i) भारतीयम्

ii) राधेयः ।

43. प्रयोगपरिवर्तनं कुरुत – 2 × 1 = 2

i) मेघाः जलं वर्षन्ति ।

ii) बालकेन धाव्यते ।

44. वाक्ये योजयत – 2 × 1 = 2

i) यदा ..... तदा

ii) विना ।

VII. श्लोकयोः तात्पर्यं कर्णाटकभाषया, आंग्लभाषया, संस्कृतभाषया वा लिखत – 2 × 2 = 4

45. विज्ञानसारथिर्यस्तु
मनः प्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति
तद्विष्णोः परमं पदम् ।।



www.careerindia.com

CAREERINDIA



46. हिताशी स्यात्
— मिताशी स्यात्
कालभोजी जितेन्द्रियः ।
पश्यन् रोगान् बहून् कष्टान्
बुद्धिमान् विषमाशनात् ।।

**अथवा**

स मृन्मये वीतहिरण्मयत्वात्
पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः ।।

VIII. यथानिर्देशम् उत्तरं लिखत — 4 × 3 = 12

47. सा तस्य गुप्तं धनम् ।
कः पाठः ? कः अवदत् ? गुप्तं धनं किम् ?

48. पितुर्निदेशम् आचर ।
कः पाठः ? का अवदत् ? कम् अवदत् ?

49. शरद्घनं नार्दति चातकोऽपि ।
कः पाठः ? कः अवदत् ? कम् अवदत् ?

50. धर्मं समाचर ।
कः पाठः ? कः अवदत् ? कस्य सन्देशः एषः ?

**अथवा**

केवलमेव रोदिति ।
कः पाठः ? कः अवदत् ? का रोदिति ?

IX. कवयोः देश-काल-कृतीनां विषये लिखत — 2 × 3 = 6

51. बाणभट्टः ।

52. जि० महाबलेश्वरभट्टः ।

X. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं विवृणुत — 3

53. गगनं गगनाकारम् ।

XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत — 3

54. प्रारभ्य विघ्नविहताः विरमन्ति धीराः ।

XII. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत — 3

55. त्वया सम्यक् अभ्यासः करणीयः । रामो वनं गत्वा दैत्यान् समहरत् । संस्कृतभाषां व्यवहारभाषां कुर्युः ।



www.careerindia.com

CAREERINDIA



XIII. संस्कृतभाषया अनुवादं कुरुत — 3

56. ವಿದ್ಯಾರ್ಥಿ ಜೀವನವು ಅಮೂಲ್ಯವಾಗಿದೆ. ಇದು ಮುಂದಿನ ಭವಿಷ್ಯದ ಬುನಾದಿಯಾಗಿದೆ. ಆದ್ದರಿಂದ ವಿದ್ಯಾರ್ಥಿಗಳು ಚೆನ್ನಾಗಿ ಅಭ್ಯಾಸ ಮಾಡುತ್ತಾರೆ.

Student life is valuable. It is the foundation for the future. Therefore students study nicely.

XIV. श्लोकौ पूरयत — 2 × 4 = 8

57. नानाभाषि ..........................................................................

..........................................................................................।

..........................................................................................

.................................................................... मामकजननीयम् ॥

58. आरम्भगुर्वी ......................................................................

..........................................................................................।

..........................................................................................

.................................................................... खलसज्जनानाम् ॥

XV. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत — 3 × 4 = 12

59. कथानुगुणं विक्रमस्य औदार्यं विवृणुत ।

60. आरोग्यनियमान् पद्यानुगुणं विवृणुत ।

61. रघोः औदार्यं वर्णयत ।

**अथवा**

अध्यात्मविद्या प्रशस्ततमा विद्या विवृणुत ।

XVI. पत्रं लिखत — 1 × 5 = 5

62. वसुपुरे विद्यमानायाः सर्वकारीय प्रौढशालायाः महशः / प्रतिमा इति मत्वा दिनद्वयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विराम पत्रं लिखत ।

**अथवा**

वसुपूरे विद्यमानायाः सर्वकारीय प्रौढशालायाः महेशः / प्रतिमा इति मत्वा पुस्तकं प्रेषयितुं 'चन्द्रिका बुक्हौस्', मैसूरुनगरं प्रति एकं पत्रं लिखत ।

XVII. प्रबन्धमेकं लिखत — 5

63. i) परिसरविज्ञानम् ।

ii) जनसंख्यास्फोटः ।

iii) गणकयन्त्रम् ।



www.careerindia.com